# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| | | |
|---|---|---|
| कक्षा –आचार्यद्वितीयवर्षम् (सत्रम्-३) | प्रश्नपत्रम् – २ | गुणा: – ७० |
| विषय: – फलितज्योतिषम् | (C.C.- ५.३.७. New & Old ) | समय: –३.०० त: ६.०० |
| दिनाङ्क: – १०/१०/२०१९ | सन्दर्भग्रन्थ: – बृहत्संहिता | |

**प्रथमान्विति:**

**प्रश्न: १ अधोलिखितयो: कस्यचित् एकस्य व्याख्या कार्या ।** ०५

(क) षष्टिश्चतुर्भिर्हीना वेश्मानि सचिवस्य ।
स्वाष्टांशयुतो दैर्घ्यं तदर्धतो राजमहिषीणाम् ॥

(ख) विस्तारषोडशांश: स चतुर्हस्तो भवेद् गृहोच्छ्राय: ।
द्वादशभागेनोनो भूमौ भूमौ समस्तानाम् ॥

**प्रश्न: २ अधोलिखितयो: कस्यचिदेकस्योपरि निबन्धं लिखत ।** १०

(क) प्रशस्तभूमिलक्षणम् ।

(ख) गृहसमीपे शुभाशुभवृक्षविचार: ।

**द्वितीयान्विति:**

**प्रश्न: ३ अधोलिखितयो: कस्यचित् एकस्य व्याख्या कार्या ।** ०५

(क) मृद्वी भू: सर्ववृक्षाणां हिता तस्यां तिलान् वपेत् ।
पुष्पितास्तांश्च मृद्नीयात् कर्मैतत्प्रथमं भुव: ॥

(ख) सलिलोद्यानयुक्तेषु कृतेष्वकृतकेषु च ।
स्थानेष्वेषु सानिध्यमुपगच्छन्ति देवता: ॥

**प्रश्न: ४ अधोलिखितयो: कस्यचिदेकस्योपरि निबन्धं लिखत ।** १०

(क) वृक्षारोपणविधि: ।

(ख) प्रशस्तशिवलिङ्गस्य निर्माणविधि: ।

**तृतीयान्विति:**

**प्रश्न: ५ अधोलिखितयो: कस्यचित् एकस्य व्याख्या कार्या ।** ०५

(क) भौमात्सत्त्वं गुरुता वुधात्सुरेज्यात् स्वर: सितात् स्नेह: ।
वर्ण: सौरादेषां गुणदोषै: साध्वसाधुत्वम् ॥

(ख) अङ्गुष्ठमूले प्रशवस्य रेखा:
पुत्रा वृहत्य: प्रमदास्तु तन्व्य: ।
आच्छिन्नमध्या बृहदायुषस्ता:
स्वल्पायुशां छिन्नलघुप्रमाणा: ॥

**प्रश्नः ६  अधोलिखितयोः कस्यचिदेकस्योपरि निबन्धं लिखत ।** **१०**

(क) पञ्चमहापुरुषलक्षणम् ।

(ख) प्रशस्तानां स्त्रीणां लक्षणम् ।

**चतुर्थान्वितिः**

**प्रश्नः ७  अधोलिखितयोः कस्यचित् एकस्य व्याख्या कार्या ।** **०५**

(क) रत्नानि विभूषयन्ति योषा भूष्यन्ते वनिता न रत्नकान्त्या ।
चेतो वनिता हरन्त्यरत्ना नो रत्नानि विनाङ्गनाङ्गसङ्गम् ॥

(ख) रात्रिविहारजागररोगव्यपदेशपरगृहेक्षणिकाः ।
व्यसनोत्सवाश्च सङ्केतहेतवस्तेषु रक्ष्याश्च ॥

**प्रश्नः ८  अधोलिखितयोः कस्यचिदेकस्योपरि निबन्धं लिखत ।** **१०**

(क) स्त्रीप्रशंसा ।

(ख) वस्त्रच्छेदनलक्षणम् ।

**संयुक्तान्वितिः**

**प्रश्नः ९  अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु ।** **१०**

(१) राज्ञः प्रथमगृहप्रमाणं लिखत ।

(२) कुशोपेताभूमिः कस्य वर्णस्य कृते शुभदा भवति ?

(३) मघुराभूमिः कस्य वर्णस्य कृते शुभदा भवति ?

(४) कस्मिन् कोणे प्रथमं शिलां न्यसेत् ?

(५) महानसं कस्मिन् कोणे शुभं भवति ?

(६) देवगृहं कस्मिन् कोणे शुभं भवति ?

(७) कति आयाः भवन्ति ?

(८) प्लक्षवृक्षः गृहात् कस्यां दिशि शुभो भवति ?

(९) केषांञ्चन् पञ्चशुभवृक्षाणां नामानि लिखत ।

(१०) एकस्मिन् अङ्गुलात्मकमाने कति यवोदराः भवन्ति ?

(११) अधिवासनमण्डपं कस्यां दिशि-शुभं भवति ?

(१२) पुरुषस्य हृदयस्य लक्षणं लिखत ।

(१३) स्त्रीणां हस्तस्य लक्षणं लिखत ।

(१४) कन्यायाः शुभाशुभनक्षत्रस्यस्य लक्षणं लिखत ।

(१५) वस्त्रच्छेदः इत्यस्य कोऽर्थः ?

----०००० ----